सत्त्व-बल-रूप-गर्व्व-शौर्य्य-युक्तं माल्यानुलेपनं हास्यप्रियमतिवाक्करणं प्रायः शुक्लैकादश्यां सप्तम्याञ्च यक्षाः,स्वाध्याय-तपोनियमोपवासव्रतचर्य्या-देव-यति-गुरु-पूजारतिं भ्रष्टशौचं ब्राह्मणमब्राह्मणं वा ब्रह्मवादिनं शूरमानिनं देवागार-सलिल-क्रीड़नरतिं प्रायः शुक्लपक्षम्यां पूर्णचन्द्रदर्शने च ब्रह्मराक्षसाः, रक्षःपिशाचास्तु हीनसत्त्व-पिशुन-स्त्रैण-लुब्धं प्रायो द्वितीयातृतीयाष्टमीषु पुरुषं छिद्रमवेक्ष्याभिधर्षयन्तीत्यपरिसंख्येयानां ग्रहाणामाविष्कृततमा ह्यष्टावेते व्याख्याताः” ॥

अत्र ये असाध्यास्तेषां लक्षणानि यथा।

“सर्व्वेष्वपि तु खल्वेष यो हस्तावुद्यम्य रोष-संरम्भो निःसंज्ञमन्येष्वात्मनि वा पातयेत् सह्यसाध्यो ज्ञेयस्तथा साश्रुनेत्रो मेढ्रप्रवृत्तरक्तः क्षतजिह्वः प्रस्रुतनासिकश्छिद्यमानमर्म्मा प्रतिहन्यमानपाणिः सततं विकूजन् दुर्व्वर्णस्तृषार्त्तः पूतिगन्धिश्च हिंसार्थी उन्मत्तो ज्ञेयस्तं परिवर्जयेत्। रत्यर्च्चनाकामोन्मादिनौ तु भिषगभिप्रायाचाराभ्यां बुद्ध्वा तदङ्गोपहारबलिश्रमेण मन्त्रभैषज्यविधिनोपक्रमेत्” ॥

अस्य चिकित्सा यथा।

“लशुनानां शतं त्रिंशदभयाघ्न्यूषणात्पलम्।
गवां चर्म्ममसी प्रस्थो द्व्याढ़कं क्षीरमूत्रयोः॥
पुराणसर्पिषः प्रस्थमेभिः सिद्धं प्रयोजयेत्।
हिङ्गुचूर्णं पल शीते दत्त्वा च मधुमाणिकाम्॥
तद्दोषागन्तुसम्भूतानुन्मादान् विषमज्वरान्।
अपस्मारांश्च हन्त्याशु पानाभ्यञ्जननावनैः” ॥

लशुनाद्यं घृतम् ॥ * ॥

“विशेषतः पुराणञ्च घृतं तं पाययेद्भिषक्।
त्रिदोषघ्नं पवित्रत्वाद्विशेषाद्ग्रहमोक्षणम्॥
गुणकर्म्माधिकं स्यानादास्वादात् कटुतिक्तकम्।
उग्रगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम्॥
लाक्षारसनिभं शीतं तद्धि सर्व्वग्रहापहम्।
मेध्यं विरेचेष्वग्र्यं प्रपुराणमतः परम्॥
नासाध्यं नाम तस्यास्ति यत्स्यात् वर्षशतं स्थितम्।
दृष्टं स्पृष्टमथाघ्रातं तद्धि सर्व्वग्रहापहम्॥
अपस्मारग्रहोन्मादवतां शस्तं विशेषतः” ॥

“एतैरौषधवर्गैर्व्वा विधेयत्वं स गच्छति।
अञ्जनोन्मादनालेपान्नावनादींश्च योजयेत्॥
शिरीषो मधुकं हिङ्गु लशुनं तगरं वचाम्।
कुष्ठञ्च वस्तमूत्रेण पिष्टं स्यान्नावनाञ्जनम्” ॥

इति नस्याञ्जनम् ॥ * ॥

“प्रसेके पीनसे गन्धैर्धूमवर्त्तिं कृताम्पिबेत्।
वैरेचनिकधूमोक्तैः श्वेताद्यैर्व्वासहिङ्गुभिः” ॥

इति धूमपानम् ॥ * ॥ [शिराम्।

“शङ्खके शान्तसन्धौ वा मोक्षयेज्ज्ञो भिषक्
उन्मादे विषमे चैव ज्वरेऽपस्मारएव च” ॥

“कामशोकभयक्रोधहर्षेर्ष्यालोभसम्भवान्।
परस्परप्रतिद्वन्द्वैरेभिरेव शमं नयेत्” ॥

“देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य तु बुद्धिमान्।
वर्ज्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च॥
सर्पिःपानादि तस्येह मृदुभैषज्यमाचरेत्।
पूजां बल्युपहारांश्च मन्त्राञ्जनविधींस्तथा॥
शान्तिकर्म्मेष्टिहोमांश्च जपस्वस्त्ययनानि च।
वेदोक्तान् नियमांश्चापि प्रायश्चित्तानि चाचरेत्॥
भूतानामधिपं देवमीश्वरं जगतः प्रभुम्।
पूजयन् प्रयतो नित्यं जयत्युन्मादजं भयम्॥
रुद्रस्य प्रमथा नाम गणा लोके चरन्ति ये।
तेषां पूजाञ्च कुर्व्वाण उन्मादेभ्यो विमुच्यते” ॥

इति च चरके चिकित्सास्थाने चतुर्द्दशोऽध्यायः॥

अस्य विशिष्टपूर्व्वरूपं यथा।

“मोहोद्वेगौ स्वनः श्रोत्रे गात्राणामपकर्षणम्।
अत्युत्साहोऽरुचिश्चान्ने स्वप्ने कलुषभोजनम्॥
वायुनोन्मथनञ्चापि भ्रमश्च क्रमतस्तथा।
यस्य स्यादचिरेणैवमुन्मादं सोऽधिगच्छति” ॥

वातजादिभेदेन रूपाणि यथा॥

“रूक्षच्छविःपरुषवाक् धमनीततो वा
श्वासातुरः कृशतनुः स्फुरिताङ्गसन्धिः।
आस्फोटयन् पठति गायति नृत्यशीलो
विक्रोशति भ्रमति चाप्यनिलप्रकोपात्॥ १॥
तृट्स्वेददाहबहुलो बहुभुग्विनिद्र-
श्छायाहिमानिलजलान्तविहारसेवी।
तीक्ष्णो हिमाम्बुनिचयेऽपि स वह्निशङ्की
पित्ताद्दिवा नभसि पश्यति तारकाश्च॥ २॥
छर्द्यग्निसादसदनारुचिकासयुक्तो
योषिद्विविक्तरतिरल्पमतिप्रकारः।
निद्रापरोऽल्पकथनोऽल्पभुगुष्णसेवी
रात्रौ भृशं भवति चापि कफप्रकोपात्॥ ३॥
सर्व्वात्मके त्रिभिरपि व्यतिमिश्रितानि
रूपाणि वातकफपित्तकृतानि विद्यात्।
सम्पूर्णलक्षणमसाध्यमुदाहरन्ति
सर्व्वात्मकं क्वचिदपि प्रवदन्ति साध्यम्” ॥ ४ ॥

अपरयोर्लक्षणानि प्रथमतोऽस्योक्तानि.।

अस्य चिकित्सा यथा।

“स्निग्धं स्विन्नन्तु मनुजमुन्मादार्त्तं विशोधयेत्।
तीक्ष्णैरुभयतो भागैः शिरसश्च विरेचनः॥
विविधैरवपीड़ैश्च सर्षपस्नेहसंयुतैः।
योजयित्वा च तच्चूर्णं घ्राणे नस्यन्तु योजयेत्॥
सततं धूपयेच्चैनं श्वगोमांसैः सुपूतिभिः।
सर्षपाणाञ्च तैलेन नस्याभ्यङ्गौ हितौ सदा॥
दर्शयेदद्भुतान्यस्य वदेन्नाशं प्रियस्य च।
भीमाकारैर्नरैर्नागैर्दान्तैर्व्यालैश्च निर्विषैः॥
भीषयेत् सततं पाशैः कशाभिर्वाथ ताड़येत्।
यन्त्रयित्वा सुगुप्तं वा त्रासयेत्तं तृणाग्निना॥
प्रतुदैर्दारयेच्चैनं मर्म्माघातं विवर्ज्जयेत्।
सापिधाने जरत्कूपे सततं वा निवासयेत्” ॥

“वरिष्ठकुष्ठमञ्जिष्ठाकटुकैलानिशाकृयैः।
तेनेदं त्रिफलाहिङ्गुवाजिगन्धामरद्रुमैः॥
वचाजमोदाकाकोलीमेदामधुकपद्मकैः।
सशर्करं हितं सर्पिः पक्वं क्षीरचतुर्गुणम्॥
बालानां ग्रहजुष्टानां पुंसां दुष्टाल्पमेधसाम्।
ख्यातं फलघृतं स्त्रीणां बन्ध्यानाञ्चाशु गर्भदम्” ॥

इति फलघृतम् ॥ * ॥

“उरोऽपाङ्गललाटेषु शिराश्चास्य विमोक्षयेत्।
अपस्मारक्रियाश्चापि ग्रहोद्दिष्टाश्च कारयेत्
शान्तदोषं विशुद्धञ्च स्नेहवस्तिभिराचरेत्॥
शोकशल्यं व्यपनयेदुन्मादे पञ्चमे भिषक्।
उन्मादेषु च सर्व्वेषु कुर्य्याच्चित्तप्रसादनम्॥
मृदुपूर्व्वं मदेऽप्येवं क्रियां विद्वान् प्रयोजयेत्।
विषजे मृदुपूर्व्वाञ्च विषघ्नीं कारयेत् क्रियाम्” ॥

इति सुश्रुते उत्तरतन्त्रे द्विषष्टितमोऽध्यायः ॥ * ॥

“तपांसि तीव्राणि तथैव दानं
व्रतानि धर्म्मो नियमश्च सत्यम्।
गुणास्तथाष्टावपि तेषु नित्याः
व्यस्ताः समस्ताश्च यथाप्रभावम्॥
न ते मनुष्यैः सह संविशन्ति
न वा मनुष्यान् क्वचिदाविशन्ति।
ये वा विशन्तीति वदन्ति मोहात्
ते भूतविद्याविषयादपोह्याः॥
तेषां ग्रहाणां परिचारका ये
कोटीसहस्रायुतपद्मसङ्ख्याः।
असृग्वसामांसभुजः सुभीमाः
निशाविहाराश्च तमाविशन्ति” ॥

“निशाचराणां तेषां हि ये देवगणसंस्तुताः।
ते तु तत्सत्त्वसंसर्गाद्विज्ञेयास्तु तदञ्जनाः॥
देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये।
देववच्च नमस्यन्ते प्रत्यर्थ्यन्ते च देववत्॥
स्वामिशीलक्रियाचाराः क्रमएव सुरादिषु।
नैरृतेया दुहितरस्तासां स प्रसवः स्मृतः॥
सत्यत्वादपरक्तेषु वृत्तिस्तेषां गणैः कृताः।
हिंसाविहारा ये केचिद्दिव्यं भावमुपाश्रिताः॥
भूतानीति कृता संज्ञा तेषां संज्ञाप्रवक्तृभिः।
ग्रहसंज्ञाभिभूतानि यस्मादेत्यनया भिषक्॥
विद्यया भूतविद्यात्वमतएव निरुच्यते।
तेषां शान्त्यर्थमन्विच्छन् वैद्यस्तु सुसमाहितः॥
जप्यैः सनियमैर्होमैरारभेत चिकित्सितम्।
रक्तानि गन्धमाल्यानि वीजानि मधुसर्पिषाम्॥
भक्ष्याश्च सर्व्वे सर्व्वेषां सामान्यो विधिरुच्यते।
वस्त्राणि मद्यमांसानि क्षीराणि रुधिराणि च॥
यानि तेषां यथेष्टानि तानि तेभ्यः प्रदापयेत्।
हिनस्ति मनुजान् येषु प्रायशो दिवसेषु च॥
दिनेषु तेषु देयानि तद्भूतविनिवृत्तये।
देवग्रहे देवगृहे हुत्वाग्निं प्राशयेद्बलिम्॥
कुशस्वस्तिकपूपाज्यच्छत्रपायससम्भृतम्।
असुराय यथाकालं विदध्याच्चत्वरादिषु॥
चतुष्पथे राक्षसस्य भीमेषु गहनेषु वा।
शून्यागारे पिशाचस्य तीव्रं बलिमुपाहरेत्॥
पूर्व्वमाचरितैर्मन्त्रैर्भूतविद्यादिदर्शितैः।
न शक्या बलिभिर्जेतुं योगैस्तान् समुपाचरेत्” ॥

“नक्तमालफलं व्योषं मूलं श्योनाकविल्वयोः।
हरिद्रे च कृतावर्त्तिः पूर्व्ववन्नयनाञ्जनम्” ॥

“न चायुक्तं प्रयुञ्जीत प्रयोगं देवताग्रहे।
ऋते पिशाचादन्येषु प्रतिकूलं न चाचरेत्॥
वैद्यातुरौ निहन्युस्ते ध्रुवं क्रुद्धा महौजसः।
हिताहितविधानञ्च नित्यमेव समाचरेत्।
ततः प्राप्स्यति सिद्धिञ्च यशश्च विपुलं भिषक्” ॥